प्रो. भारतेन्दु पाण्डेय
Prof. Bhartendu Pandey
विभागाध्यक्ष
Head of the Department

संस्कृत विभाग
DEPARTMENT OF SANSKRIT
दिल्ली विश्वविद्यालय
UNIVERSITY OF DELHI
दिल्ली -110007
DELHI-110007

011 - 27666657
Web-site - sanskrit.du.ac.in
E-mail -head@sanskrit.du.ac.in

संस्कृत/2025
Skt/2025/

दिनांक :
Dated: 03.11.2025

---

**विज्ञप्तिः**

**सम्मान्याः महोदयाः,**

सादरं विनिवेद्यन्ते तत्र भवन्त ऐषमो नवम्बरमासस्य नवम्यां तिथौ रविवासरे विभागोऽयम् अखिलभारतीयाम् अन्तर्विश्वविद्यालयीयाम् **इन्द्रविद्यावाचस्पतिसंस्कृतसद्योवाक्स्पर्धामा**योजयतीति। अवसरेऽस्मिन् कार्यक्रमानुसारं स्वयं समागत्य स्वसंस्थातः प्रतिस्पर्धिदलं प्रेष्य च श्रीमन्तोऽस्मान् कृतार्थयन्त्विति प्रार्थ्यते।

साफल्यमनुष्ठानस्यास्य भवदायत्तम् ।

**: कार्यक्रमस्तत्सम्बद्धसूचनाश्च :**

**तिथि :** ०९.११.२०२५

(जन्मतिथिः इन्द्रविद्यावाचस्पतीनां कुलपतिचराणां
हरिद्वारस्थगुरुकुलकाङ्गडीविश्वविद्यालयस्य)

**समयः** – दशवादने पूर्वाह्णे

**आयोजनस्थलम्** – द्वाविंशः कक्षः कलासङ्कायभवनगतः

**नियमाः–**

१. स्पर्धायामस्यां विश्वविद्यालयविभागानां महाविद्यालयानाञ्च दलान्येव भागं ग्रहीतुमर्हन्ति।
२. स्पर्धायामस्यां स्नातक-स्नातकोत्तरकक्षयोरेव विद्यार्थिनः प्रतिभागितां करिष्यन्ति ।
३. स्वसंस्थातोऽधिकारपत्रमानयदेव दलं प्रतिभागितायै अनुमंस्यते।
४. प्रत्येक दलेऽधिकादधिकं द्वावेव स्पर्धिनौ स्याताम्।
५. स्पर्धिनो वयः आयोजनतिथौ त्रिंशद्वर्षाद् अधिकं न स्यात्। अतोऽस्य निश्चयाय वयःप्रमाणपत्रमवश्यमानयेत् स्पर्धी।
६. प्रत्येकं परिस्थितौ निर्णायकानामेव निर्णयोऽन्तिमत्वेन मान्यो भविष्यति अतस्तत्संस्तुत्यैव प्रथमादिपुरस्काराः प्रदास्यन्ते ।
७. आयोजनतिथौ प्रतिस्पर्धायाः प्रारम्भात् प्राग् यथोचितं पञ्जीकृता एव स्पर्धिनोऽत्र भागं ग्रहीतुमर्हिष्यन्ति।
८. प्रत्येकं वक्ता स्वप्रस्तुत्यै पञ्चमिनटात्मकमेव कालावधिमवाप्स्यति ।

**भवदीयाः**

**संयोजकौ**
**सौरभ जी सहायकाचार्यः**
**अजितकुमारः सहायकाचार्यः**

**आचार्योऽध्यक्षश्च**
**पाण्डेयो भारतेन्दुः**